National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(66): 20-23
© 2026 NJHSR
www.sanskritarticle.com

**राहुल दे**
शोधच्छात्रः, ज्योतिषशास्त्रविद्याशाखा,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
एकलव्यपरिसरः, अगरतला, त्रिपुरा

**Correspondence:**
**राहुल दे**
शोधच्छात्रः, ज्योतिषशास्त्रविद्याशाखा,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
एकलव्यपरिसरः, अगरतला, त्रिपुरा

# वास्तुशास्त्रपरम्परायां राजप्रासादानां प्रमुखशैली

**राहुलदे**

**शोधसारः -** भारतीयवास्तुशास्त्रे **राजप्रासादाः**, राजगृहाणि अथवा राजवेश्माः उच्चाधिकारिणां, राज्ञां तथा शासकानां निवासस्थानानि निर्दिशन्ति। एते केवलं वैभवस्य, सौन्दर्यस्य शक्तेश्च प्रतीकाः न भवन्ति, अपि तु ब्रह्माण्डीयऊर्जायाः, दिशानां, प्राकृतिकतत्त्वानां (पञ्चमहाभूतानि`- पृथ्वी, जलम्, अग्निः, वायुः, आकाशः) तथा दैवीयपदानां सह पूर्णसमन्वयं स्थापयन्ति।

वास्तुशास्त्रं यत् वेदपुराणागमादिग्रन्थसमन्वितं प्राचीनं स्थापत्यविज्ञानं मन्यते, तस्मिन् राजप्रासादनिर्माणे सूर्यगतेः, चन्द्रमसः प्रभावस्य, गुरुत्वाकर्षणस्य, वायुप्रवाहस्य तथा ब्रह्माण्डीयऊर्जायाः सम्यग्विचारः क्रियते, येन निवासिनां स्वास्थ्यं, समृद्धिः, विजयः, दीर्घायुष्यम् च सिध्यति। अस्मिन् लेखे राजप्रासादानां प्रमुखशैलयः, वर्गीकरणं, निर्माणनियमाः, दिशानिर्णयः, मापनविचारः, अलङ्कारतत्त्वानि तथा ऐतिहासिकदृष्टान्ताः वास्तुशास्त्रानुसारं विस्तरेण निरूप्यन्ते।

**कूटशब्दः-** राजप्रासादः, आयाम-नियमनं, शालाविधानं, राजवेश्मः,शाला, स्थापत्यं, वेश्मः, ब्रह्मपदम् इत्यादयः।

**भूमिका -** भारतीयसंस्कृतेः स्थापत्यपरम्परायां **राजप्रासादाः** राज्ञां निवासस्थानरूपेण विशेषमहत्त्वं धारयन्ति। प्रमुखेषु वास्तुग्रन्थेषु यथा **समराङ्गणसूत्रधारः**, **मानसारः**, **मयमतम्**, **बृहत्संहिता**, **मत्स्यपुराणं**, **अग्निपुराणं** तथा **अर्थशास्त्रं** राजप्रासादानां वर्गीकरणं, निर्माणनियमाः, स्थापत्यशैल्यः तथा दोषनिवारणविधयः विस्तारतः निरूपिताः सन्ति। एते ग्रन्थाः मुख्यतया द्वयोः स्थापत्यपरम्परयोः आधारे प्रतिष्ठिताः सन्ति – १. उत्तरीया परम्परा - नागरशैली (विश्वकर्मप्रणीतम्) २. दक्षिणीया परम्परा - द्रविडशैली (ब्रह्मा, मयादिभिराचार्यैः प्रतिपादिता)। वास्तुशास्त्रेषु राजप्रासादयोजना **वास्तुपुरुषमण्डलस्य** आधारेण भवति। अस्मिन् मण्डले पञ्चचत्वारिंशद्देवताः राक्षसाश्च अधिष्ठिताः भवन्ति। तत्र - ८१ पदयुक्तं मण्डलम् – एकाशीतिपदम्, ६४ पदयुक्तं मण्डलम् – चतुःषष्टिपदम्, १०० पदयुक्तं मण्डलम् - शतपदम् इति प्रचलितानि। अस्य मण्डलस्य मध्ये **ब्रह्मपदम्** इति क्षेत्रं प्रतिष्ठितं भवति। निर्माणात् पूर्वं वास्तुपूजनं विधिवत् करणीयम्।

**राजप्रासादानां वर्गीकरणम् -** वास्तुशास्त्रीयन्यमानुसारं राजप्रासादाः आकारेण, राजपदव्या, उपयोगेन, शालासंख्यया तथा दिशाविन्यासेन वर्गीकृताः भवन्ति। वास्तुशास्त्रेषु राज्ञः निवासस्थानरूपस्य राजवेश्मनः निर्माणे निश्चितं प्रमाणं निर्दिष्टम् अस्ति। तत्र राजवेश्मनः विस्तारे त्रिविधं मानं प्रशस्तं मन्यते। तेषु ज्येष्ठं मानं अष्टोत्तरशतकरपरिमितं, अर्थात् एकशताष्टकरपरिमाणयुक्तं भवति। तदनन्तरं मध्यं मानं नवतिः करपरिमितं निर्दिष्टम् अस्ति। अधमं वा जघन्यं मानं सप्ततिः करपरिमितं भवति। एतानि त्रयाणि मानानि वास्तुशास्त्रविद्भिः राजवेश्मनिर्माणे योग्यानि, समुचितानि च स्वीकृतानि सन्ति। यथोऽक्तं –

**अष्टोत्तरशतं ज्येष्ठं मध्यं स्यान्नवतिं करान्।**
**जघन्यं सप्ततिकरान् राजवेश्म प्रशस्यते॥**
**अतो हीनं न कर्तव्यं महतीं श्रियमिच्छता॥**[1]

मानसार-ग्रन्थे भूपतीनां राज्ञां च निवासस्थानरूपाणां हर्म्याणां (राजप्रासादानां) लक्षणं वर्णयति। तत्र सर्वप्रथमं तेषां प्रमाणं निर्दिश्यते। राजप्रासादस्य विस्तारः एकाशीतिदण्डपरिमाणात् आरभ्य शतदण्डपर्यन्तं कर्तव्यः इति निर्दिष्टम्। ततः परं द्विद्विदण्डेन, अर्थात् द्वौ द्वौ दण्डौ योजयित्वा, क्रमशः तस्य विस्तारः सैकद्विशतदण्डपर्यन्तं वर्धनीयः। एवं प्रकारेण राजप्रासादस्य मानानि कनिष्ठ, मध्यम तथा उत्तम् - इति त्रिविधरूपेण विभागेन निर्दिष्टानि सन्ति।[2]

**शालासंख्यानुसारं भवनवर्गीकरणम् -** वास्तुशास्त्रे भवनानां संरचना तथा तेषामङ्गानां विस्तरेण प्रतिपादनं कृतम् अस्ति। तेषु शाला इत्यस्य विशेषं महत्त्वम् अस्ति। शाला इति शब्दस्य उल्लेखः वैदिककाले एव प्राप्यते। प्रारम्भे "शाला" अथवा "शाल" इति शब्दः मुख्यतया गृहस्य अर्थे एव प्रयुक्तः आसीत्।

वैदिक-ऋषयः शालाविधानं वा गृहविधानं निर्दिशन्तः तस्य निर्माणविधिं नियमांश्च विवृण्वन्ति। ते सर्वप्रथमं गोशाला, यज्ञशाला इत्यादिषु आवश्यकानां स्तम्भानां निर्माणम्, तेषां संयोजनं, बन्धनं, तथा बांस-काष्ठ-तृणादीनां प्रयोगं विषये वेदेषु अनेकेषु स्थानेषु उल्लेखं कुर्वन्ति।

पुराणेषु "शाखातः" शालायाः उत्पत्तिः स्वीक्रियते। परवर्तिषु ग्रन्थेषु शाला इति शब्दः कक्षस्य पर्यायवाचिरूपेण अपि प्रयुक्तः भवितुम् आरब्धः। मानसारे शाला इति शब्दः गृहस्य देवालयस्य च उभयोरपि अर्थयोः प्रयुक्तः दृश्यते। कालान्तरे शाला अथवा शाल इति शब्दः गृहनिर्माणार्थं विस्तीर्णे भूखण्डे निर्मीयमाणानां विविधकक्षाणां भवनानां च बोधकत्वेन अपि प्रयुज्यमानः अभवत्।

वास्तुशास्त्रीयग्रन्थेषु एकशालातः दशशालपर्यन्तं भवनानां विविधभेदाः निरूपिताः सन्ति। उक्तं यथा –

**तैतिलानां द्विजादीनां वर्णानां वासयोग्यकाः।**
**एकद्वित्रिचतुस्सप्तदशशालाश्च षड्विधाः॥**[3]

भारतीयज्ञानविज्ञानस्य मूलग्रन्थे **ऋग्वेदे** वास्तुशास्त्रस्य प्रधानदेवस्य **वास्तोष्पतेः** प्रार्थनारूपः मन्त्रः निर्दिष्टः अस्ति। अस्मिन् मन्त्रे गृहस्य रोगरहितत्वं, धनधान्यसमृद्धिः तथा गृहे निवसतां द्विपदां चतुष्पदां च कल्याणस्य कामना कृतास्ति।

**ॐ वास्तोष्पते प्रति जानीह्यस्मान् त्स्वावेशो अनमीवो भवा नः।**
**यत् त्वेमहे प्रति तन्नो जुषस्व शं नो भव द्विपदे शं चतुष्पदे॥**[4]

अस्यैव कल्याणस्य प्राप्तये गृहस्य निर्माणं कर्तव्यम् इति निर्देशः प्रदत्तः अस्ति। गृहस्य निर्माणं मनुष्यस्य कर्तव्यं इत्यपि प्रतिपादितम्। न केवलं स्वस्य सुखाय, अपि तु पत्नी-पुत्राणां पशूनां च सुविधा-सुरक्षार्थं गृहस्य निर्माणम् आवश्यकम् इति निरूपितम्। गृहस्य प्रकोष्ठानां च निर्देशे प्रायः **"शाला"** इति शब्दस्य प्रयोगः दृश्यते। अतः वास्तुशास्त्रे शालाविधानविषये विचारं कृत्वा प्रथमं **"शाला" अथवा "शाल"** इति शब्दस्य अर्थः विचार्यते।

अथर्ववेदे **"तृणैरावृता पलदान् वसाना रात्रिरिव शाला जगतो निवेशनी"**[5] इति मन्त्रः सर्वप्राचीनरूपेण तृणादिभिः निर्मितं गृहम् **"शाला"** इत्येव प्रतिपादयति।

**मानसारे** अपि शाला इति शब्दः गृहस्य देवालयस्य राजप्रासादस्य च उभयोरपि अर्थयोः प्रयुक्तः दृश्यते -

**सुराणां भूसुराणां च वर्णानां वासयोग्यकम्।**
**सर्वासामपि शालानां रक्षणं वक्ष्यतेऽधुना॥**[6]

**राजप्रासादानां प्रमुखशैल्यः -** भारतीयराजप्रासादानां स्थापत्यशैल्यः क्षेत्रीयराजवंशानां परम्पराभिः, सांस्कृतिकसम्पर्कैः तथा वैदेशीकप्रभावैः (मुगल-ब्रिटिशादिभिः) क्रमशः विकसिताः। एताः मुख्यतः १. **राजपूतशैली**, २. **मुगलशैली**, ३. **इण्डो-सरासेनिकशैली**, तथा ४. **दक्षिणभारतीय (द्राविड/केरल) शैली** इति विभक्ताः दृश्यन्ते। एताः शैल्यः परस्परं प्रभाविता अपि अभवन् - यथा राजपूतप्रासादेषु मुगलकालीनजालिकाकर्मः तथा उद्यानरचना दृश्यते, इण्डो-सरासेनिकशैल्यां तु राजपूत-मुगल-गॉथिकशैलीनां समन्वयः दृश्यते। अधः प्रत्येकशैल्याः विस्तृतवर्णनं, मुख्यलक्षणानि, प्रसिद्धदृष्टान्ताः, उपयुक्तनिर्माणसामग्री च प्रदत्तानि।

**१.राजपूतशैली-(**प्रायः अष्टमशताब्द्याः आरभ्य अष्टादशशताब्द्यन्तम्) राजस्थान-मध्यप्रदेश-गुजरातप्रदेशेषु राजपूतराजवंशैः (चौहान-राठौर-सिसोदियादिभिः) एषा शैली विकसिताभवत्। एषा शैली प्रायः **दुर्ग-प्रासादरूपनिर्माणेषु** केन्द्रिताभूत्। यत्र रक्षणप्रधानता तथा सौन्दर्ययोजनापि संयुक्ता दृश्यते। बहवः प्रासादाः गिरिशिखरेषु निर्मिताः, तथा स्थानीयलोहितबलुकाश्मशीलानां व्यापकतया प्रयुक्तः।[7]

**मुख्यलक्षणानि:** - उच्चपीठिका तथा दृढप्राकारभित्तयः।

निर्गतवातायनयुक्तस्थानं तथा सूक्ष्मनक्काशीयुक्ताः स्तम्भाः बहवः प्राङ्गणानि, छत्रिकाः, तथा वर्णचित्रयुक्ताः भित्तयः, तोरणद्वाराणि, जालिकाकर्मः, जलसंरचनाः।

प्रारम्भे एषा शैली हिन्दूमन्दिरस्थापत्यात् प्रेरिताभवत्। परन्तु अनन्तरं विशेषतः अकबरकालात् मुगलप्रभावः - जालिकाकर्मः, चारबागोद्यानयोजना दृश्यते।

**उदाहरणानि -** आमेरदुर्गः (जयपुरे), मेहरानगढ़दुर्गः (जोधपुरे), उदयपुरस्य सिटी-पैलेसः

**२. मुगलशैली -** (षोडशशताब्द्यारभ्य - अष्टादशशताब्दी पर्यन्तम्) मुगलसम्राट्भिः विशेषतः अकबर-जहाँगीर-शाहजहाँ आदिभिः एषा शैली विकसिताभवत्। अस्यां फारसी-इस्लामीक-परम्परायाः प्रभावः भारतीयतत्त्वैः सह संयोजितः। अस्याः प्रमुखगुणाः सममितिः, भव्यता

तथा उद्यानकेन्द्रितरचना। निर्माणेषु लोहितबलुकाश्मशीला तथा संगमरमरनामकशीला प्रमुखतया प्रयुक्तः।[8]

**मुख्यलक्षणानि:** - विशालाः गुम्बदाः, वक्राकारद्वाराणि, स्तम्बाः, चारबागोद्यानरचना, जालिकापट्टिकाः, जलकुण्डानि, विशालाट्टालीकाः तथा उच्चस्तरीय सभागृहाणि। बाबर-हुमायूँकालात् आरम्भः अकबरकाले राजपूतप्रभावस्य समन्वयः; शाहजहाँकाले संगमरमर-निर्माणेषु विशेषवैभवम्।

**उदाहरणानि -** लालकिल्ला (दिल्ली), फतेहपुरसीकरीमहलसमूहः, आग्रादुर्गः तथा लाहौरदुर्गः अपि मुगलस्थापत्यस्य उत्कृष्टदृष्टान्तौ स्तः।

**३.इण्डो-सरासेनिकशैली -** (एकोनविंशतिशताब्द्यारभ्य – विंशति-शताब्दी पर्यन्तम्) ब्रिटिशराज्यकाले विकसिताऽयं मिश्रितस्थापत्यरूपः अस्ति। यत्र मुगल-राजपूत-गॉथिक-विक्टोरियनशैलीनां समन्वयः दृश्यते। एषा शैली विशेषतः देशीयनृपैः स्वप्रासादनिर्माणेषु स्वीकृता।[9]

**मुख्यलक्षणानि:**- पलाण्ड्वाकाराः गुम्बदाः, उच्चमीनारयुक्तसंरचना, लघुछत्रिकाः,जालिकाकर्मः,वर्णचित्रयुक्तकाचपट्टिकाः,यूरोपीयस्तम्भाः भारतीयोत्कीर्णनेण सह संयुक्ताः

**उदाहरणानि -** मैसूरप्रासादः (अम्बाविलासपैलेसः), लक्ष्मीविलास-प्रासादः (बड़ोदरा), चेपाकप्रासादः (चेन्नई)

**४. दक्षिणभारतीय / द्राविड-केरलशैली -** दक्षिणभारते विशेषतः केरल-तमिलनाडु-कर्नाटकप्रदेशेषु मन्दिरस्थापत्यात् प्रेरिताऽयं प्रासादशैली दृश्यते। अत्र काष्ठस्य व्यापकः उपयोगः भवति।[10]

**मुख्यलक्षणानि:**- गोपुरमाकारद्वाराणि, काष्ठनिर्मितेषु भागेषु सूक्ष्मोत्कीर्णयुक्तानि पुष्प-दैविकचित्राणि, अर्धचन्द्राकारछदनरूपाः छदनानि (sloping roofs), बहूनि प्राङ्गनानि, काष्ठनिर्मित-भूमितलानि तथा छदनानि

**उदाहरणानि -** पद्मनाभपुरमप्रासादः (केरल-तमिलनाडुसीमायाम्)

**५. अन्याः क्षेत्रीयशैल्यः**

❖**बङ्ग-ओडिशाशैली**-वक्रछदनरूपनिर्माणानि (curvilinear roofs)

❖**पर्वतीयशैली (हिमालयप्रदेशे)** - काष्ठनिर्मितसंरचनाः।

पुनश्च **"विश्वकर्मावास्तुशास्त्रम्"** नामके वास्तुशास्त्रे शिल्पकर्मणां तथा भवननिर्माणकार्याणां विविधाः आचारप्रकाराः दृश्यन्ते। तेषां मध्ये मुख्यतया सप्तविधाः क्रियाशैलयः प्रसिद्धाः सन्ति। ताः एव - **१. पाञ्चाली शैली। २. मागधी शैली। ३. शौरसेनी शैली। ४. वाङ्गिकी शैली। ५. कोसली शैली। ६. कालिङ्गी शैली। ७. द्राविडी** शैली। इति नामभिः निर्दिष्टाः। एताः सर्वाः शैल्यः शिल्पकर्मणि, विशेषतः प्रासादाः, राजप्रासादाः, मन्दिराणि तथा अन्येषां भवनानां निर्माणे, अलङ्कारविन्यासे च विशेषप्रसिद्धाः सन्ति। उक्तं यथा –

**पाञ्चाली मागधी चान्या शौरसेनी च वाङ्गिकी।**
**कोसली चापि कालिङ्गी द्राविडीति क्रियाकला॥**
**प्रसिद्धा शिल्पकार्येषु कल्पनाशतशोभिनी।**
**देशभेदेन भूपालः स्वेच्छया तां समाश्रयेत्॥**[11]

अतः इदानीं प्रत्येकशैलीनां विषये विस्तृततया विचारः क्रियते -

**१. पाञ्चाली क्रियाशैली -**

पाञ्चाली क्रियाशैली उत्तरभारते पाञ्चालप्रदेशे विकसितः स्थापत्यप्रकारः मन्यते। अस्यां शैल्यां भवनरचनायाः सममितिः, सन्तुलितमानप्रमाणं तथा सौम्यालङ्कारविन्यासः विशेषतया दृश्यते। प्रासादेषु स्तम्भानां समुचितव्यवस्था, मण्डपानां स्पष्टविन्यासः तथा शिखरस्य मध्यमोन्नतिः अस्याः प्रमुखलक्षणानि भवन्ति। शिल्पिनः अस्यां शैलीयां सूक्ष्मरेखाविन्यासेन तथा सुकोमलालङ्कारैः प्रासादस्य सौन्दर्यं वर्धयन्ति।

अस्याः शैल्याः मूलस्वभावः माधुर्यं सन्तुलनं च इति कथ्यते। न अतीव विशालरचना, न च अत्यल्पा; किन्तु सम्यग्विन्यस्तरूपेण प्रासादः निर्मीयते। मण्डपः, स्तम्भः, प्राकारः तथा प्रवेशद्वाराणि शास्त्रीयमानानुसारं विन्यस्यन्ते। अतः पाञ्चालीशैली शिल्पपरम्परायां सौम्यता तथा सुसंहतयोजना इत्येतयोः प्रतीकरूपेण प्रसिद्धा अस्ति।[12]

**२. मागधी क्रियाशैली -**

मागधी शैली प्राचीनमगधप्रदेशे (आधुनिक बिहारप्रदेशे) विकसितः स्थापत्यप्रकारः अस्ति। अस्यां शैल्यां दृढनिर्माणम्, विशालप्राकाराः, तथा स्थैर्यप्रधानरचना विशेषरूपेण दृश्यते। प्रासादानां भित्तयः प्रायः स्थूलाः, स्तम्भाः बलिष्ठाः, तथा मण्डपाः विस्तीर्णाः भवन्ति। अस्यां शैल्यां अलङ्काराणां अपेक्षा संरचनात्मकदृढता अधिकं महत्त्वं लभते।[13] मागधी स्थापत्ये शिखररचना सामान्यतः उन्नता किन्तु स्थूलप्रमाणयुक्ता दृश्यते। भवनस्य आधारभागः दृढः कृतः भवति, येन सम्पूर्णरचनायाः स्थायित्वं सुनिश्चितं भवति। राजप्रासादेषु, दुर्गेषु तथा विशालमन्दिरेषु अस्याः शैल्याः प्रभावः स्पष्टतया अवलोक्यते।[14]

**३. शौरसेनी क्रियाशैली -**

शौरसेनी शैली शूरसेनप्रदेशे (मथुरामण्डले) प्रचलिता स्थापत्यपरम्परा अस्ति। अस्यां शैल्यां अलङ्कारिकता, स्तम्भविन्यासस्य सुष्ठुता तथा कलात्मकसूक्ष्मता विशेषरूपेण दृश्यते। मथुरा-प्रदेशे प्राचीनकालात् शिल्पकला अत्यन्तं विकसितासीत्, तस्य प्रभावः अस्यां स्थापत्यशैल्यामपि दृश्यते। प्रासादेषु तथा मन्दिरेषु स्तम्भाः विविधमूर्तिभिः, पुष्पलताभिः तथा अलङ्कारिकरेखाभिः अलङ्क्रियन्ते। मण्डपाः सुन्दररूपेण विस्तारिताः भवन्ति, तथा प्रवेशद्वाराणि भव्यतोरणयुक्तानि भवन्ति।[15]

**४. वाङ्गिकी क्रियाशैली -**

वाङ्गिकी शैली वङ्गप्रदेशे विकसितः स्थापत्यप्रकारः अस्ति। अस्यां शैल्यां भवनानां छदरचना, वक्ररेखाविन्यासः तथा कलात्मकमाधुर्यं विशेषरूपेण दृश्यते। वङ्गप्रदेशस्य आर्द्रजलवायोः

कारणात् तत्र भवनरचनायां विशिष्टछदप्रकाराः विकसिताः।[16] प्रासादेषु छदाः बहुधा वक्ररूपेण विन्यस्यन्ते, येन वर्षाजलस्य निर्गमनं सुलभं भवति। अलङ्कारविन्यासे मृदुत्वं तथा सूक्ष्मरेखाकारीत्वं दृश्यते।[17] एवं वाङ्गिकी क्रियाशैली स्थापत्यकले प्राकृतिकपरिस्थितेः अनुकूलनम् तथा सौन्दर्यसमन्वयः इत्येतयोः उत्कृष्टदृष्टान्तः अस्ति।

**५. कोसली क्रियाशैली -**

कोसली शैली कोसलप्रदेशे प्रचलिता स्थापत्यपरम्परा अस्ति। अस्यां शैल्यां योजनाविन्यासस्य स्पष्टता, शास्त्रीयमानानुगमनम् तथा सम्यग्विन्यस्तरचना प्रमुखतया दृश्यते।[18] मन्दिरेषु तथा प्रासादेषु गर्भगृहं, मण्डपः, प्राकारः, स्तम्भः इत्यादीनां विन्यासः अत्यन्तं व्यवस्थितरूपेण क्रियते। कोसली स्थापत्ये सौन्दर्यं तथा शास्त्रीयता उभयं समन्वितं दृश्यते।[19]

**६. कालिङ्गी क्रियाशैली -**

कालिङ्गी शैली प्राचीनकालिङ्गप्रदेशे (आधुनिक ओडिशा) विकसितः स्थापत्यप्रकारः अस्ति। अस्यां शैल्यां प्रासादानां शिखररचना, अलङ्कारसमृद्धता तथा भव्यरूपविन्यासः अत्यन्तं प्रसिद्धः अस्ति।

कालिङ्गस्थापत्ये "रेखादेउल" तथा "पिडादेउल" इत्यादयः प्रासादप्रकाराः दृश्यन्ते।[20] शिखरम् उन्नतं तथा लम्बवक्ररेखाभिः युक्तं भवति। भित्तिषु देवमूर्तयः, लतापत्राणि तथा विविधाः शिल्परचनाः सूक्ष्मतया उत्कीर्णाः भवन्ति।[21]

**७. द्राविडी क्रियाशैली -**

द्राविडी शैली दक्षिणभारते प्रचलिता प्राचीनतमेषु स्थापत्य-परम्परासु एकाऽस्ति। अस्यां शैल्यां विशालमन्दिरप्रासादाः, उन्नतगोपुराणि, बहुमण्डपयुक्ता योजना तथा विस्तीर्णप्राकाराः प्रमुखलक्षणरूपेण दृश्यन्ते।[22]

मन्दिररचनायां गर्भगृहस्य उपरि स्थितः "विमानं" नामकः शिखरप्रकारः निर्मीयते। गोपुराणि बहुस्तरीयरचनया सुशोभितानि भवन्ति, येन सम्पूर्णमन्दिरसमूहस्य भव्यता वर्धते। द्राविडस्थापत्ये मूर्तिकला, स्तम्भशिल्पं, तथा भित्त्यलङ्कारः अत्यन्तं समृद्धः दृश्यते।[23] अतः एषा शैली भारतीयस्थापत्यपरम्परायां विशालता, वैभवम् तथा कलासम्पन्नता इत्यस्य प्रतीकरूपेण विख्याता अस्ति।

**निष्कर्षः -** अतः अन्ते निष्कर्षरुपेण एवं वक्तुं शक्यते यद् एताः सर्वाः स्थापत्यशैल्यः भारतस्य सांस्कृतिकैकतां प्रतिपादयन्ति। वास्तुशास्त्री-यशैलिभिः सह परवर्तिकालीनशैलिनामपि परस्पर-सामञ्जस्यं प्रतिपादयति। यथा राजपूतशैलितः मुगलप्रभावः, ततः ब्रिटिश-कालीनमिश्रणम् एवं स्थापत्यपरम्परा निरन्तरं विकसिता-भवत्। अद्यापि आमेरदुर्गः, फतेहपुरसीकरी, लालकिल्ला तथा अन्ये बहवः देशीयराज्ञा निर्मितराजप्रासादाः च वैश्विकधरोहरस्थलरूपेण प्रसिद्धानि पर्यटनकेंद्राणि च सन्ति।

**ग्रन्थसूची -**

1.समराङ्गणसूत्रधारः, डा. सुधाकरमालवीयः, चौखम्बा संस्कृत भवन, 2011.

2.मानसारः, प्रसन्नकुमार-आचार्यः, Oxford University Press,

3.मयमतम्, डॉ. शैलेजा पाण्डेयः, चौखम्बा सुरभारती प्रकाशन, 2007.

4.ऋग्वेदः

**पादटिप्पणी -**

1 समराङ्गणसूत्रधारः, अध्याय- 30, श्लोक – 01-02

2 मानसारः, अध्याय – 40, श्लोक – 01-06

3 मयमतम्, अध्याय- 26, श्लोक - 01

4 ऋग्वेदः ७।५४।१

5 अथर्ववेदः ९।३।१७

6 मानसारः, अध्याय – 35, श्लोक - 01

7 Percy Brown, *Indian Architecture*, पृ. 100-110.

8 Percy Brown, *Indian Architecture*, पृ. 110-120.

9 George Michell, उक्तग्रन्थे (*op. cit.*), पृ. 200-210.

10 Percy Brown, *Indian Architecture*, पृ. 129– 133.

11 विश्वकर्मावास्तुशास्त्रम्, अध्याय -12, श्लोक – 12-13

12 Stella Kramrisch, *The Hindu Temple*, pp. 120-125.

13 Acharya P. K, *Architecture of Manasara*, pp. 230-235.

14 Percy Brown, *Indian Architecture*, पृ. 45-50.

15 Krishna Deva, *Temples of North India*, पृ. 70-75.

16 David J. McCutchion, *Late Mediaeval Temples of Bengal*, पृ. 30-35.

17 Percy Brown, *Indian Architecture*, पृ. 98-102.

18 Adam Hardy, *The Temple Architecture of India*, Wiley, 2007, pp. 85-90.

19 P. K. Acharya, *Manasara on Architecture*, पृ. 310-315.

20 Thomas E. Donaldson, *Hindu Temple Art of Orissa*, पृ. 40-48.

21 Percy Brown, *Indian Architecture*, पृ. 112-118.

22 Adam Hardy, *The Temple Architecture of India*, पृ.210-220.

23 George Michell, *The Hindu Temple: An Introduction*, University of Chicago Press, 1988, pp. 85-95.